श्रीकृष्णाह्निककौमुदी

Kṛṣṇāhnika-kaumudi

Moonlight of the Daily Acts of Kṛṣṇa

Version 0.2

श्रीकविकर्णपूरविरचिता
by Kavi Karṇapūra
edited, translated, and annotated
by
Neal Delmonico

November 27, 2000

Chapter 1

प्रथमः प्रकाशः

रजनिचरमयामे स्तोकताराभिरामे
किमपि किमपि वृन्दादेशजाताभिनन्दा ।
विततिरकृत राधाकृष्णयोः स्वापवाधा-
मतिमृदुवचनानां शारिकाणां शुकानाम् ॥ १ ॥

प्रथममनुपरोधा बोधयामास राधाम्
असकृदमृतकल्पैः शारिकालिः सुजल्पैः ।
अथ कृतसुखदोहः कृष्णमुद्धूतमोहः
किमपि शुकसमूहः प्रेमदत्तोपगूहः ॥ २ ॥

व्रजपतितनयाङ्कासङ्गतो वीतशङ्का
विधुमुखि किमु शेषे निर्भरं रात्रिशेषे ।
प्रमदमधुपपुञ्जे मा परं तिष्ठ कुञ्जे
न गणयसि विगर्हां किं गुरूणामनर्हाम् ॥ ३ ॥

अगणितकुलनिष्ठा मा निकुञ्जे शयिष्ठाः
परिहर सुरतघ्नं स्वापमुद्गच्छ शीघ्रम् ।
समजनि सविशेषः पश्य दोषावशेषः
कुरु न गतसमाधां बन्धुवर्गस्य बाधां ॥ ४ ॥

इयमजनि दिगैन्द्री दृश्यतां देवि सान्द्री-
भरदरुणिमधारा त्वत्पदाब्जानुकारा ।
इयमपि च वराकी सत्वरा चक्रवाकी
परिमिलति रथाङ्गे जातविच्छेदभङ्गे ॥ ५ ॥

अपि तव मुखशोभामाप्तुकामोऽतिलोभाद्

अपरिकलितकामः स्वं वपुस् त्यक्तुकामः ।
चरमशिखरिशृङ्गं प्राप्य पश्यैव तुङ्गं
व्रजति शशधरोऽस्तं वारयेदद्य कस्तम् ॥ ६ ॥

सुदति कुमुदिनीनामङ्कमासाद्य लीना
मदमधुकरमाला कालमासाद्य लोला ।
सरति कमलिनीनां राजिमेतामदीनां
भवति समय एव ग्लानिहर्षादिदेवः ॥ ७ ॥

स्मितकमलमुखीनां मण्डली ते सखीनां
मिलति परमहृष्टा स्वस्वगेहादभीष्टा ।
सुमुखि विगतदोषे या किल त्वां प्रदोषे
निविडतिमिरपुञ्जं प्रापयत् केलिकुञ्जम् ॥ ८ ॥

सुमुखि नयनमुद्रां मुञ्च निर्धूय निद्रां
कलय वदनमासां विद्युदुद्द्योतभासां ।
रतिविगलितभूषां व्यस्तपर्यस्तवेषां
विलुलिततनुमेतास्त्वां भजन्तां समेताः ॥ ९ ॥

वियदतिलघुतारं त्वद्वपुः क्षुण्णहारम्
विगलितकुसुमानां वर्त्म शेफालिकानाम् ।
त्रितयमिदमिदानीमेकरूपं तदानीं
अपि यदपि तथापि त्वद्वपुः श्रीभिरापि ॥ १० ॥

त्रुटितपतितमुक्ताहारवत्ते वियुक्ता
भवदुडुततिरेषा स्वल्पमात्रावशेषा ।
चिरशयनमवेक्ष्यारुन्धती ते विलक्ष्या
भवदिव परिवक्रे पश्य सप्तर्षिचक्रे ॥ ११ ॥

निजकरपरिपुष्टा पश्य सेयं प्रविष्टा
शशिमुखि ललिताङ्गी सन्निधौ ते कुरङ्गी ।
कुरु सकृपमपाङ्गे किञ्चिदञ्चत्तरङ्गे
भवतु वत कृतार्था प्रीतये ते समर्था ॥ १२ ॥

नवकिशलयबुद्ध्या जातितोऽन्तर्विशुद्ध्या-
रुणपदकमलन्ते स्वादितुं कृष्णकान्ते ।
त्वरितमुपसरन्ती त्वत्सखीनां वहन्ती
करसरसिजघातं याविधत्ते प्रयातम् ॥ १३ ॥

शशिमुखि तव फेलामात्रभोगे सखेला

तव पदजलपानामोदमात्रावधाना ।
अपि भवदवलोकाभावसञ्जातशोका
तव मुखशशिबिम्बालोकमात्रावलम्बा ॥ १४ ॥

हरिरतिकुतुकी ते नेत्रयुग्मं मिमीते
नयनयुगममायप्रेम यस्याः प्रमाय ।
किमपि विमलमुक्तामालया चारुवक्त्रा
नियतमुपमिमानः संशयं निर्धुनानः ॥ १५ ॥

इति निगदितवत्यः शारिकाः प्रेमवत्यः
सुखदपदार्थां वाचमुत्थापनार्थाम् ।
यदि किमपि विरेमुः पत्रिणस्तं प्रणेमुः
समुपसृतनिकुञ्जाः प्राप्तसंमोदपुञ्जाः ॥ १६ ॥

अथ शयनसतृष्णं बोधयामास कृष्णं
विततिरपि शुकानां कृष्णहर्षोत्सुकानाम् ।
श्रवणसुखदसौम्यैः स्निग्धशब्दार्थरम्यैः
सरसतरमनल्पैः कूजितैः सीधुकल्पैः ॥ १७ ॥

प्रणयरसगभीराश्चारुशब्दार्थधीराः
कलसुमधुरकण्ठाः प्रेमजल्पेष्वकुण्ठाः ।
सति समयविवेके बोधयाञ्चक्रुरेके
न खलु वत विदग्धाः कार्यकाले विमुग्धाः ॥ १८ ॥

जय जय गुणसिन्धो प्रेयसीप्राणबन्धो
व्रजसरसिजभानो सत्कलारत्नसानो ।
इह हि रजनिशेषे किम्मना नाथ 'सेषे
समयमवकलय्यापीष्यते कुञ्ज्शय्या ॥ १९ ॥

मदमधुपयुवानः प्राप्तदोषावसान-
च्युतकुसुमवनान्तः स्वापमुद्यातवन्तः ।
दधति कतिपयथ्यां केलिमम्भोजवीथ्यां
सति समयविवेके के विमुह्यन्ति लोके ॥ २० ॥

क्वचन मुखविषादः क्वापि हास-प्रसादः
क्वच दयितवियोगः क्वापि कान्तस्य योगः ।
कुमुदकमलवीथ्योर्वैसदृश्येऽतितथ्ये
भवति किमु न कालः क्षोभशोभाविशालः ॥ २१ ॥

त्वमसि समयवेत्ता सर्वदुःखैकभेत्ता
भवसि भुवनबन्धुः सद्गुणग्रामसिन्धुः ।
व्रततिभवनतल्पं मूर्तिमन्मोदकल्पं
यदपि तदपि मुञ्च स्वस्ति तेऽस्मादुदञ्च ॥ २२ ॥

सुभग रजनिशेषे स्वापगेहे सुशेषे
त्वमिति हि जननी ते संशयम् स्वं धुनीते ।
समयमथ विदित्वा जागरार्थं त्वरिता
स्वयमियमुपगन्त्री स्नेह एवात्र मन्त्री ॥ २३ ॥

अयमपि च शिखण्डी जागरित्वैव खण्डी
कृतसुललितकेकः कालनिष्ठाविवेकः ।
प्रमिलति तव निद्राहानयेऽधीदरिद्राः
शिव शिव निजसेवाकालमुज्झन्ति के वा ॥ २४ ॥

अपि शरदि दुरापस्रंसनो यत्कलापः
प्रबलतरगरिम्ना तावकेनैव धाम्ना ।
निरवधिबलमानस्निग्धताद्योतमानः
क्व नु समयविपन्नस्त्वत्पदाब्जे प्रपन्नः ॥ २५ ॥

विविधमणिसदच्छं मण्डलीकृत्य पुच्छं
प्रतिनियतमकुण्ठः प्रोल्लसच्छ्यामकण्ठः ।
तव सह दयिताभिः पश्यतः प्रीणिताभिर्
जनयति ललितानि प्रत्यहं यः सुखानि ॥ २६ ॥

जय सुभग नमस्ते श्रूयतां सत्वरस्ते
चिरशयनसपीडः कौत्ययन्ताम्रचूडः ।
उअप्नतनिजसेवाकालसंमोदपीवा
न हि समयविदग्धः कार्यकाले विमुग्धः ॥ २७ ॥

इति कलवचनानां शारिकाणां शुकानां
रुतमतिशयरम्यं श्रोत्रपेयं निशम्य ।
विहितशयनबाधा सा जजागार राधा
प्रथममथ स कृष्णः स्वापलीलावितृष्णः ॥ २८ ॥

युगपदुभयनिद्राभङ्गविध्वस्तमुद्रा
युगपदुभयनेत्रापाङ्गभङ्गी विचित्रा ।
युगपदुभयघूर्णाजातसंक्लेशपूर्णा-
भवदुभयविलोकाभावतः प्राप्तशोका ॥ २९ ॥

प्रसभमुभयदोष्णोः पीडनं संसहिष्णोर्
उभयवपुष एकीभाव आसीद् विवेकी ।
सुरतसमरलीला या पुरासीत् सुशीला
किमिव पुनरुपायात् सा समेषोरुपायात् ॥ ३० ॥

उभयपुलकजालै रत्नसूचीसलीलैर्
उभयरभससूत्रैर्दीर्घदीर्घातिचित्रैः ।
युगपदुभयतन्वोः सीवनं दिव्यभान्वोर्
अकृत कुसुमचापेनैव योगे दुरापे ॥ ३१ ॥

युगपदुभयजृम्भारम्भणस्योपलम्भाद्
उभयदशनकान्तिः ख्याप्यनिर्व्यूढशान्तिः ।
उभयमुखसहायऽन्योन्यनिर्मञ्छनाया-
गमदिव समतत्त्वं मङ्गलारात्रिकत्वम् ॥ ३२ ॥

युगपदुभयदोष्णः पीडनेनैव कोष्णः
प्रणय इव हृदिस्थः स्वीकृताश्रुव्यवस्थः ।
उभयनयनपक्ष्मा स्नावयन् शोकलक्ष्मा-
वददिव कृतरोषं भाविविच्छेददोषम् ॥ ३३ ॥

अथ शयनतलात्तावुत्थितौ सम्प्रमत्ताव्
इव सपदि विबुध्य स्वस्वनीवीं निबध्य ।
विरहमसहमानौ चित्तपीडां दधानौ
न ययतुरकृतार्थौ तस्थतुर्नासमार्थौ ॥ ३४ ॥

जयत उदितवत्या लोचने ते सुदत्या
अलसवलितघूर्णे स्वापलीलाविशीर्णे ।
विकचकमलमध्ये साधु माध्वीकमेध्ये
स्तिमितमवरुवद्भ्यां सोपमे खञ्जनाभ्याम् ॥ ३५ ॥

विलसदलसपूर्णैः पक्ष्मभिः प्राप्तगूर्णैः
सममतिरुरुचाते लोचने चारुणी ते ।
अलिभिरुपहताभ्यां सोपमे पङ्कजाभ्यां
शयनगतरसस्य प्रेयसो माधवस्य ॥ ३६ ॥

मुमुचतुरथ कुञ्जावासमुद्दीप्तगुञ्जा-
चयवदरुणरागेणारुणे दिग्विभागे ।
रतिरणविजयान्ते निह्नुवानौ निशान्ते
निजनिजतनुयष्टी तौ त्रपाभुग्नदृष्टी ॥ ३७ ॥

क्वचन घुसृणपङ्कः क्वापि सिन्दूरजोऽङ्कः
क्षतविरहविपक्षप्रस्नुतासृक्सपक्षः ।
क्वचन कुसुमदाम च्छिन्नकोदण्डधाम
क्व च विलुलितहारश्छिन्नमौर्विप्रकारः ॥ ३८ ॥

क्वचन मृगमदाङ्काः कुत्रचित् कज्जलाङ्काः
स्मरनरपतिदन्तिच्छेदकल्पाः स्फुरन्ति ।
स हि रतिरणरङ्गः कौतुकोद्यत्तरङ्गः
समजनि सुमुखीनामागतानां सखीनाम् ॥ ३९ ॥

उभयमुभयचित्ते न्यस्य चित्तं सुवित्ते
प्रणयरसविपाकैः सन्ततं सातिरेकैः ।
क्षणविरहस्हाभ्यं केवलं विग्रहाभ्यां
लघुलघुपदमेतौ दम्पती तौ प्रयातौ ॥ ४० ॥

भ्रमभरविपरीते वाससी नीलपीते
प्रकृतिमगमयित्वा नोपनीते वसित्वा ।
अलसमथ मिथोंसे न्यस्य जातप्रशंसे
भुजयुगलमभीतौ जग्मतुर्दम्पती तौ ॥ ४१ ॥

पथि पिशुनमतिभ्यः शङ्कमानौ गुरुभ्यः
चलचकिततरङ्गौ निक्षिपन्तावपाङ्गौ ।
परमगुणगभीरौ कामसङ्ग्रामधीरौ
ययतु रतिवितन्त्रौ राधिकाकृष्णचन्द्रौ ॥ ४२ ॥

न पथि न भवने वा लक्षितौ तौ वने वा
सहजसदनुरक्त्या स्वीययानन्दशक्त्या ।
परिजननयनानामुत्सवानादधानाव्
अथ पथि विहरन्तौ रेजतुर्लोककान्तौ ॥ ४३ ॥

विरमति रतियज्ञे कौतुकात्तत्र जज्ञे
यदवभृथमिहैतौ स्नानतश्चारुपूतौ ।
अथ किमपि पदार्थौ सारभूतौ कृतार्थौ
गृहमधि परिशिष्टां रात्रिमेवाशयिष्टाम् ॥ ४४ ॥

तनव इव भटानां बा,नघातोत्कटानां
क्षतविगमभिषग्भिः शोधिता योगयुग्भिः ।
अतिसरति रताङ्के तत्तनू निर्गताङ्के
विबभतुरनुभावाद्योगशक्तेः स्वभावात् ॥ ४५ ॥

स्मल्ल् इति श्रीकृष्णाह्निककौमुद्यां प्रथमप्रकाशः

Chapter 2

द्वितीयः प्रकाशः